र्जुनशिरीषशिंशपासनराजवृक्षेन्द्रवृक्षतिन्दुकसोमवल्ककृष्ण-
तकार्जुनप्रभृतीनां कुक्षप्रमाणो दण्डग्रन्थिर्भवेत्। यस्तु
सपादितः परशुः स यथाकामं प्रयोज्यः।

कुणपलक्षणं तु कुणपशब्दे दृश्यं। २वृक्षे पु० शब्द-
रत्ना०। तस्येदम् शिवा० अण्। कौठार तत्सम्बन्धिनि
त्रि० स्त्रियां ङीप्। अल्पार्थे क। कुठारक क्षुद्रकुठारे
पुंस्त्री० स्त्रियां कुठारिका। [ कारे पु० शब्दरत्ना०।

**कुठारु** पु० कुठ–आरु। १वृक्षे २वानरे पुंस्त्री०मेदि०। ३शस्त्र-

**कुठि** पु०कुठि–इन् किच्च। १पर्व्वते २वृक्षे च उणा० को०।

**कुठिक** पु० कुठ–इकन् किच्च। (कुड़) कुष्ठे हारा०।

**कुठेर** पु०कुठि–एरन् बा०नुमभावः। १पर्णासे उज्ज्व०। २वह्नौ
शब्दमा०। ३श्वेततुलस्याम् (वावुइतुलसी) राजनि०।

**कुठेरक** पु०कुठेर इव कायति कै–क। नान्दोवृक्षे राजनि०।
स्वार्थे क। २श्वेततुलस्यां (वावुइतुलसी) शब्दच०।

**कुठेरज** पु० कुठेरइव जायते जन–ड "सह सुपा" पा०स०।
श्वेततुलस्याम् शब्दरत्ना०।

**कुठेरु** पु० कुठ–एरुक्। चामरवाते त्रिका०।

**कुड** वैकल्ये भ्वा० इदित् पर० अक० सेट्। कुण्डति अकुण्डीत्
प्रनिकुण्डति कुण्डः। [प्रनिकुण्डते। कुण्डम्।

**कुड** दाहे भ्वा० इदित् आत्म० सक० सेट्। कुण्डते अकुण्डिष्ट

**कुड** रक्षणे चुरा० इदित् उभ० सक० सेट्। कुण्डयति ते
अचुकुण्डत् त। प्रनिकुण्डयति ते।

**कुड** अदने सक० बाल्ये अक० तुदा० पर० सेट् कुटादि।
कुडति अकुडीत् चुकोड़। प्रनिकुडति कुडपः कुडवः

**कुडप** (व) पु० कुड–कपन् (कक्न्)श। प्रस्थचतुर्थांशरूपे प-
रिमाणभेदे अमरः अर्द्धर्चादि। कर्षशब्दे विवृतिः क्षीर-
स्वामिमते पात्रः। "द्रोणस्तु खार्य्याः खलु षोड़शोऽंशः
स्यादाढको द्रोणचतुर्थभागः। प्रस्थस्तुर्थांश इहाढकस्य
प्रस्थाङ्घ्रिराद्यैः कुडवः प्रदिष्टः" "लीला० तेन षोड़शक-
र्षमितः कुडवः आर्द्रद्रव्याणां तु द्वात्रिंशत्कर्षमित
इत्याह सुश्रुतः

"पलकुडवादीनामतो मानन्तु व्याख्यास्यामः। तत्र
द्वादशधान्यमाषा मध्यमाः सुवर्णमाषकः। ते षोडश
सुवर्णम्। अथ मध्यमनिष्पावा वा एकोनविंशतिर्द्ध-
रणम्। तान्यर्द्धतृतीयानि कर्षः। ततश्चोर्द्धं चत-
र्गुणमभिवर्द्धयन्तः पलकुडवप्रस्थाढकद्रोणा इत्यभिनि-
ष्पद्यन्ते तुला पलशतं तानि विंशतिर्भारः शुष्काणामिदं
मानमार्द्रद्रव्याणाञ्च द्विगुणमिति"।

"अथ षष्ठे गते काले यवप्रस्थमुपार्ज्जयन्। यवप्रस्थं
तु तं सक्तून्कुर्व्वन्त तपस्विनः। कृतजप्याह्निकास्ते तु
हुत्वा चाग्निं यथाविधि। कुडवं कुडवं सर्व्वे (चत्वारः)
व्यभजन्त तपस्विनः" "इत्युक्तः प्रतिगृह्याथ सक्तूनां
कुडवं द्विजः" भा० आश्व० ६०।

**कुडि** पु० कुण्ड्यते दह्यते कुडि–दाहे इन् नलोपश्च। देहे
सि० कौ० "कुठिकम्प्योर्नलोपश्चेति" उणा० उज्ज्वलदत्तेन
कुठि गतिप्रतिघाते इति व्याख्यातम् कौमुदीकृता तु कुडि–
दाहे इति व्याख्यातम्। अतः मतभेदेन उणादिसूत्रे
पाठद्वयम्।

**कुडिश** पुंस्त्री० कुड्यते कुड–अदने बा० श इट्। (कुडची)
ख्याते मत्स्यभेदे राजनि०। "कुडिशो मधुरोबल्यः कषायो
वह्निदीपनः। लघुः स्निग्धो वातरोगे पथ्यश्च रोचनस्तथा।
बलकारी कोष्ठबन्धकारी च भिषजां मतः" राजनि०।

**कुडिहुञ्ची** स्त्री० क्षुद्रकाञ्चनवल्लवृक्षे(क्षेट उच्छिया) राजनि०।

**कुड्मल** कुड–बाल्ये बा० कलच्। १मुकुले विकासोन्मुखे कु-
सुमे सि०कौ०। २नरकभेदे न० कुट्मलशब्दे उदाहृत
मनुवचने कुड्मलमिति वा पाठः "दलितकोमलपाटल
कुड्मले" माघः तारका०इतच्। कुड्मलित जातमुकु-
कुले त्रि०।

**कुड्य** न० कुड्ड कार्क्श्ये ण्यत् कौतेरप्रत्रा० यक् डुगागमश्च
इत्युज्ज्वलदत्तः। १भित्तौ (भित) अमरः २विलेपने मेदि०
३कौतूहले शब्दरत्ना०। "वैद्यं सस्थापमाणोऽङ्गं कुड्य-
मास्तरणानि वा। "चन्दनरसैरुपलिप्तकुड्ये" सुश्रु०।
"वैदूर्य्यकुड्येषु शशिद्युतिभ्यः" माघः। स्वार्थे क।
भित्तौ शब्दर०।

**कुड्यच्छेदिन्** पु० छिद–णिनि ६त०। चौरभेदे येन गृह-
भित्तिं विदार्य्य चौर्य्यं क्रियते तत्र शब्दरत्ना०।

**कुड्यच्छेद्य** पु० कुड्यं छेद्यं यस्य। १खनके। कुड्यस्य
तन्निर्म्माणाय तदर्थं छेद्यम् चतुर्थ्यर्थे ६त०। भित्ति-
निर्म्माणाय खाते २गर्त्ते त्रिका०।

**कुड्यमत्स्य** पुंस्त्री०कुड्ये मत्स्य इव। गृहगोधिकायां हेम०
जातित्वात् स्त्रियां ङीष् यलोपः। कुड्यमत्सी तत्रैव
शब्दर०। [कुणयति ते अचुकुणत् त। प्रनिकुणयति

**कुण** आमन्त्रणे, मन्त्रणे च अद० चु० उभ० सक० सेट्।

**कुण** उपकरणे शब्दे च तुदा०पर०सक० सेट्। कुणति अको-
णीत्। प्रनिकुणति उपकरणं दानादिना पोषणम्।

**कुणक** पु० कुण्यते उपक्रियते कुण–कर्म्मणि घञर्थे क ततः